In Public domain. Digitization Muthulakshmi Research Academy

85

अतः परं प्रवक्ष्यामि योगं योगस्यारब्धकार्यादोषमलादिक्षपणोपायत्वात्पदार्थसंबन्धः पतिपदार्थतया पाटलिकः संबन्धः। — द्विहेतुत्वात् शुचिशब्देन सूचितः प्रकरणसंबन्धो योगकाण्डतया सूत्रसंबन्धः समुच्चयपदेनैव वाक्यात्मकोऽपि योगि योगात्मकान् गुणानि — भिर्वाक्यैः। अतश्चर्याकाण्डादनन्तरं योगं संक्षेपतः प्रकर्षाद्वक्ष्यामि। कस्यायं योगसंस्कार अतआह —

एकाकिनस्तु शान्तस्य यतचित्तस्य विरागिणः
निस्पृहस्य। उक्ताहारविहारस्य उक्तचेष्टस्य कर्मसु।
उक्तस्वप्नावबोधस्य तत्वतः शृणुषण्मुख।
पुरुषस्यैवायं संस्कारकोन -- तं जलानामिवचित्तस्येत्यर्थः। शिवयोगस्य सर्वज्ञत्वादि प्रकाशकात्।
कीदृशस्य एकाकिनः सर्वसङ्गपरित्यागादपरिग्रहस्य संन्यासाश्रमः शान्तस्य हिंसादिरहितस्य यमनियमयुक्तस्येत्यर्थः। चित्तसंयमो हि यमो नियमश्चेंद्रियसंयमः। यदाह पतञ्जलिः —

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहः यमाः।
शौचसंतोषस्वाध्यायेश्वर प्रणिधानानि नियमा इति"

अत एव यतचित्तस्य प्राणायामप्रत्याहाराभ्यांवशीकृत — पलक्षितसर्वज्ञः यस्य शक्तिपाद्वशात् विरागिणः

In Public domain. Digitization Muthulakshmi Research Academy

असारवराग्ययुक्तस्य निस्पृहस्य वाहका भोग-
विमुखस्य युक्ताहारविहारस्य यदु- मन्मूगेन्द्रै-
मितं जीर्णाज्ञानस्वस्थेत्यादि । किंच ।
सर्वकर्मसु युक्तचेष्टस्य उचितकरण इतियावत् ।
उक्तस्वप्नावबोधयोक्तकालानीति- गर्भस्य तस्यतं
योगध्येय ध्यातृसंबन्धात्मकत्वात: शृणु । ननु
पतञ्जलादेरिव समाधिरूपं तस्य योगाङ्गत्वेन श्रुते
यदुक्तं श्रीमन्मतङ्गै:-

प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणम् ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते" इति ॥

अतएव युजिन् योग एव इत्यस्माद्धातो र्योगशब्दो-
ननु युज समाधाविति । एतदेव सूचयन् ज्ञानिन
३ एवयोगाधिकार इत्याह यो ध्यो यच्चत ध्यानं तद्वै
ध्यान प्रयोजनम् । सर्वज्ञेनानियो- सयोगं योक्तुमर्हति ।
चशब्दा ध्येयं सेत्यर्थ: । यदाह-

आत्मा ध्याता मनो ध्यानं ध्येय: शम्भो महेश्वर: ।
यत्परं परमैश्वर्यमेत ध्यान प्रयोज- ननं मन: ।
यथाव ध्येय वस्तु स्वरूपालोचनं चिन्तेत्यर्थ: । ज्ञातो
ध्यान मुच्येते । यच्छ्रूयते तद्रूपचिन्तनं ध्यानमितिन

ननु मनोनिग्रह इति व्या- यं तस्य योगाङ्गत्वेनाप्र-
सिद्धे: । उपलक्षणं चैतत् अन्यान्यपि यागाङ्गान्यं

In Public domain. Digitization Muthulakshmi Research Academy

गिनं च योगं ज्ञात्वा योगाभ्यासः कार्यः। किंच।
मानामानौ समौ कृत्वा सुखदुःखे समे तथा।
हर्षं भयं विषादं च संत्यज्य योगमभ्यसेत्॥
यदाहुः —
नहृष्यत्युपकारेण नापकारेण कुप्यति।
यः समः सर्वभूतेषु जीवन्मु...म इष्यत इति॥
अथ योगस्थानम् —
शून्यागारे मठे रम्ये देवतायतने शुभे।
४ नदीतीरे विविक्ते वा गृहे वोरवनेऽपिवा॥
प्रच्छन्ने च विविक्ते च निः—तनवर्जिते।
योगदोषविनिर्मुक्ते निर्विकल्पे निरातपे॥
योगदोषा पिपीलिकादयः। निर्विकल्प इति परकीय-
त्वादि विकल्परहिते॥
योगाभ्यासोपक्रमः।
स्नात्वा शुचिरुपस्पृश्य प्रणम्य शिरसा शिवम्।
योगाचार्यं नमस्कृत्य योगं युञ्जीत मानवः॥
योगासनान्याह —
पद्मस्वस्तिकेनापि उपस्थायाञ्जलिं तथा।
पीठार्थमर्धचन्द्रं वा सर्वतोभद्रमेव च॥
आसनं रुचितं बध्वा पद्मादासनलक्षणम्।
संहितान्तरो देवप्य —॥
अथ करणमाह —

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्ध्वकायः समशिराः।
सर्वसंगान्परित्यज्य आत्मसंस्थं मनो गुहः।
कुर्यादित्यध्याहारः।
ततश्च सर्वसंगान्परित्यज्य आत्मसंस्थं मनः कुर्यादिति
५ विषयेभ्यः समस्तेन्द्रियाधिष्ठानुर्मनसः प्रत्याहरणं कुर्यादिति यावत्। अनेन प्रत्याहारारव्यं योगाङ्गं संक्षेपात् शेयम्। किंच नदानीं नदंतैः संस्पर्शेदन्नात् सृक्वण्यौ च न जिह्वया, किंचिदुन्मिषितनेत्रस्तु शिवं सम्यक् नदोच्चरेत्। प्रत्याहारकाले बिबीजात्मक-मूल——मनसा स्मरेदित्यर्थः। अथतदुच्चारप्रयोजनम्। सोऽभासयति तत्वानि तन्मात्राद्यानि देहिनाम्। अयमभिप्रायः। षडांदसो।
बिसर्जनीयलोपात्——ति शिवमन्त्रोऽवश्यमाणवात्।
सगर्भप्राणायामपूर्वं शिवाधिष्ठितं तत्वादयेनोच्चार्यमाणः। समाधिलाभक्रमेण तत्वानि तावत्प्रकाशयति।
मन——त्रानुसंधानेन शिवाधिष्ठिताभिमतत्वयोजना॥
तत्तत्साक्षात्कारो भवतीति यावत् तन्मात्रा माद्यानि यानि पृथिव्यादीनि भूतानि तन्मात्राद्या एषामिन्द्रियादीनां तानि सर्वाणि तत्वानि श्रीमन्मतङ्गयुक्तवत्प्रकाशयतीति "वेदितव्यम्। तानि चतत्वानि तस्यैव च शास्त्रस्यानुसं(धाना)त् बन्धकत्वान्निवर्तन्त इत्याह—
६ पुनर्विनाशकश्चैव असंयुक्तः षडाननः। तेषामिति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीं चाङ्गानामपि तदुद्भूतत्वात् पृथगुच्चार
णयोगीत्याह। न पृथक् हृदयं तस्य शिरोनक्षिरवायुह।
चर्मास्त्रमेत्र सहितं तस्मादेव प्रवर्तते। अथ प्राणा-
यामस्यापि सगर्भतां प्र- यनु कुंभक प्राणायाम पूर्वकं
ध्यानं कार्यमित्याह।
प्राणापानौ समौ कृत्वा सुषुम्नान्तरचारिणौ।
तयोर्वृत्तिं विरुध्यात्मा शिवं ध्यायेद्विगः॥
प्राणायामस्य सगर्भतोक्तां श्रीमन्मृगेन्द्रेऽपि।
सोऽपि ध्यानजपोपेतः सगर्भोन्यस्त इष्यते इति॥
अथ ध्यानस्यैव प्रकर्षावस्थात्मकं समा- - हे
अविनाभावसंयुक्तो ज्योतीरूपं सुनिर्मलम्।
सूक्ष्मव्यापकं नित्यं निर्विकल्पं सदा बुधः॥
निर्विकल्पमिति ध्येयाकारस्फुटीभावेन ध्यात्रादि-
- गेरहितमित्यर्थः। यदाह पतञ्जलिः।
प्रत्यये तानता ध्यानं तदेवस्वरूपशून्यमेव समाधि-
रिति। इत्थं सगर्भनिगर्भभेदेन प्राणायामानां द्वैविध्ये
- न्यथा त्रैविध्यमाह। उत्तमा मध्यमा मन्दाः सगर्भा-
स्त्रिविधाः स्मृताः। सगर्भा इत्युपलक्षणम्।
अगर्भाणामप्युत्तमादिभेदैश्चानन्तरमेव वक्ष्यति।
- रौतरेणापि त्रैविध्यमाह।
प्राणायामांश्चतान् कुर्यात् पूरक कुम्भकरेचकान्।
सगर्भाणां प्राणायामादीनां समाधिलाभक्रमेण तत्त्व-

(२२२ (ब))

In Public domain. Digitization Muthulakshmi Research Academy

जयस्योक्त — अगर्भाणां फलमाह —
प्राणायामैर्बर्हिर्दोषान् धारणाभिस्तु किल्बिषम्।
प्रत्याहारेण संसृज्य ध्यानेनानश्वरान्गुणान्॥
यावच्छरीरभावि — णिमादीन् गुणानित्यर्थः।
अनश्वरः अशून्यः शरीरः स्थैर्यमपि जायत इति
सिद्धम्। अथ पूरकादिलक्षणमाह —
उदरं पूरयित्वा तु वायुना या — — पितम्।
प्राणायामो भवेदेव पूरको देहपूरकः
विधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः।
संपूर्णकुम्भवत्तिष्ठेत्प्राणायामः सकुम्भकः।
तदो — रेचयेद्वायुं मृदुनिश्वाससंयुतम्।
रेचकस्त्वेष विख्यातः प्राणसंशयकारकः।
पूरकरेचकौ वामदक्षिणनाडीभ्यां कार्यावित्युक्तं
प्राणसंशयकारक इत्युक्तान्तिदशायां ग्रन्थे —
वेधपूर्वं रेचकस्य प्राणवियोगहेतुत्वादुच्यते।
तेषामेव कालभेदादुत्तमादि भेदमाह।
प्रसार्य चाग्रहस्तं तु जानुकृत्वा प्रदक्षिणम्॥ (222)
वैधिकां तु ततो दद्यान्मात्रैषा त्वभिधीयते।
मात्राद्वादशाविज्ञेयः प्रमाणं तालसंज्ञकम्॥
तालद्वादशकं ज्ञेयं प्राणायामस्तु कस्यंसः।
मध्यमस्तु चतुर्विंशत् ज्येष्ठो द्विगुणो भवेत्॥
तेषां चानुष्ठानविधिः।

In Public domain. Digitization Muthulakshmi Research Academy

एकैकान्वर्धयेन्मात्रां प्रत्यहं योगवित्तमः।
सत्वरेण विलम्बेन क्रमेणैव विवर्धयेत्॥

9 इदानीं हृदयादिस्थानेषु ध्येयस्वरूपविषये निबद्धस्य मनसो धारणादि कालमाह।

प्राणायामोत्तमो घट्टिगुणा धारणा मता।
धारणाद्विगुणो योगो योगोऽपि द्विगुणीकृतः।
योगसिद्धिरिति ज्ञेया शिवेन परमात्मना॥

अत्र योगशब्देन ध्येयस्वरूपचिन्तनमपि।
ध्यात्रा सह ध्येयस्य संबन्ध इति कृत्वा ध्यानमुच्यते।
योगसिद्धिशब्देन तु समाधिः। धारणाध्यानसमाधीनां
योगाङ्गानां क्रमेण प्राप्ते श्रवणात्।

ननु श्रीमन्मृगेन्द्रे धारणादीनां कालाधिक्यं श्रूयते उक्तं हि तत्र —

अयमर्कगुणः कालः कृतचित्तव्यवस्थितिः।
प्राप्नोति धारणाशब्दो धारणासिद्धिदानतः॥
धारणा द्वादशाध्यानं दिव्यालोकप्रवृत्तितः।
समाधिमणिमादीनां द्वादशैतानि कारणमिति॥

सत्यं क्रियाभेदस्य तन्त्रभेदहेतुत्वादविरोधः

2 अङ्गी तु योगो ध्येयवस्तुसाक्षात्कारात्मको विशेषसंबन्ध इत्याह। तदानुपूर्व्यते सूक्ष्मं गन्धतन्मात्रमालम्बे।

रसं तेजश्च स्पर्शं च शब्दतन्मात्रमेवच।
पूर्व्यते क्रमयोगेन वर्णभावैः पृथग्विधैः॥

In Public domain. Digitization Muthulakshmi Research Academy

अहंकारं मनो बुद्धिं गुणमव्यक्तपूरुषम् ।
अभिव्यक्तानि जानीयात् स्वधर्मगुणलक्षणम् ॥
विद्यां कलां ततः कालमायां विद्यां ततः परम् ।
दृष्ट्वानुक्रमशः सर्वान् पुनरस्त्रेण भेदयेत् ॥
विद्येश्वरं ततस्तत्त्वं ततस्सादाशिवं परम् ।
हित्वाकं तु क्षुरिकास्त्रेण ततः सूक्ष्मं शिवं विशेत् ॥

२२८ अत्र च भूतानां स्थूलानामस्य प्रत्यक्षेणापि विज्ञातुं शक्यत्वात् केवलयोगसाक्षात्कार्याणि तन्मात्रादीन्युच्यन्ते परमार्थतः पृथिव्यादिस्वरूपमपि सूक्ष्मयोगेन साक्षात्कर्तव्यमित्युक्तं श्रीमन्मतङ्गादौ ।

२२ ततश्च पृथिव्यादीनि शिवान्तानि तत्त्वान्येवं साक्षात्कृत्य प्रागुक्तवन्मूलयुक्तेन क्षुरिकास्त्रेण भेदयेज्जयेत् । बन्धकत्वान्निवर्तयेदित्यर्थः । उक्तं हि प्राक्

सोद्रासयति तत्त्वानि तन्मात्रादीनि देहिनाम्
पुनर्विनाशकश्चैव अस्त्रयुक्तः षडाननेति ।

एवमेतानि सालम्बनेन योगेन निष्कले शिवे स्वात्मानं युञ्जादित्यर्थः । अत्र च तत्त्वजयोपयोगित्वेन शास्त्रान्तरोक्तं तत्कार्यमपि योगाङ्गमर्थसिद्धमेव यच्छ्रूयते — ऊर्ध्वोऽन्तरङ्गो योगस्येति । अथ योगफलं दर्शयति ।

अमृतात्मा शिवः साक्षात् तस्मिन्विष्टस्तु योगवित् ।
सर्वज्ञः सर्वगः सूक्ष्मः सर्वेशः सर्वकृद्भवेत् ।

ननु । यद्येवं योगेनैव मुक्तिसिद्धेर्दीक्षाया अप्यानर्थक्य-

In Public domain. Digitization Muthulakshmi Research Academy

प्रसङ्गः। तन्न एवंविधस्य शिवयोगस्य दीक्षाया
विनानुष्ठानासिद्धेरारब्धकार्यकर्मक्षिप्तमलादि-
२२ निवर्तन एव च्यरितार्थत्वादनधिकारिणां शिवशास्त्रं-
विनासमस्ततत्त्वविषयज्ञानाद्यभावाच्च। अत एव
मात्रप्रसङ्गात् ज्ञेयं वस्तु दर्शयति।

सर्वेष्वेव शास्त्रेषु ज्ञेयं वस्तुचतुष्टयम्।
पशुः पाशः पतिश्चैव शिव श्चेति यथाक्रमम्।

पतिरधिकारावस्थं शिव एवात्र च पतिपदार्थः सैव
सोपाधिका निरुपाधिकाभ्यां भेदद्वयमुपचारादुच्यत
इति वक्ष्यामः। अत श्च ज्ञानस्यापि दीक्षाया अङ्गत्वान्मोक्ष-
हेतुत्वं परंपरया सिद्धमित्याह।

ज्ञात्वा तु तत्त्वसद्भावं तत्रसारं तु दुर्लभम्।
२२३ सर्वथा वर्तमानोऽपि गृह्णाति नपुनस्तनुम्॥

इति लक्षाद्वया व्याप्तक श्रीमदघोरशिवाचार्य-
विरचितायां श्रीमत्सर्वज्ञानोत्तरवृत्तौ
योगप्रकरणम्

In Public domain. Digitization Muthulakshmi Research Academy